## वच उम्। (२०/२४८४)

वचेः अङ्गस्य अङि परतः उमागमो भवति। अवोचत्, अवोचताम्, अवोचन्॥

## शीङः सार्वधातुके गुणः। (२१/२४४१)

शीङः अङ्गस्य सार्वधातुके परतः गुणो भवति। शेते, शयाते, शेरते। सार्वधातुके इति किम्? शिश्ये॥

## अयङ् यि क्ङिति। (२२/२६४९)

[1]यकारादौ क्ङिति प्रत्यये परतः शीङः अङ्गस्य अयङ इत्ययमादेशो भवति। शय्यते। [2]शाशय्यते। प्रशय्य[3]। उपशय्य[4]। यि इति किम्? शिश्ये। क्ङिति इति किम्? शेयम्॥

## उपसर्गाद्ध्रस्व ऊहतेः। (२३/२७०२)

उपसर्गादुत्तरस्य ऊहतेरङ्गस्य ह्रस्वो भवति यकारादौ क्ङिति प्रत्यये परतः। समुह्यते। समुह्य गतः। अभ्युह्यते। अभ्युह्य गतः। उपसर्गात् इति किम्। ऊह्यते। ऊहतेः [5]इति किम्? समीह्यते। यि इत्येव, समूहितम्। क्ङिति इत्येव, [6]समूह्योऽयमर्थः। अणः इत्येव, आ ऊह्यते ओह्यते। समोह्यते॥

## एतेर्लिङि। (२४/२४८७)

एतेरङ्गस्य उपसर्गादुत्तरस्य लिङि यकारादौ क्ङिति परतो ह्रस्वो भवति। उदियात्। समियात्। अन्वियात्। आशिषि लिङि अकृत्सार्वधातुकयोः (७.४.२५/२२९८) इति दीर्घत्वे कृते ह्रस्वोऽनेन भवति। उपसर्गात् इत्येव, ईयात्। अणः इत्येव, आ ईयात् एयात्। समेयात्॥

## अकृत्सार्वधातुकयोर्दीर्घः। (२५/२२९८)

अकृद्यकारे असार्वधातुकयकारे च क्ङिति परतोऽजन्तस्याङ्गस्य दीर्घो भवति। भृशायते। सुखायते। [7]दुःखायते। चीयते। [8]चेचीयते। स्तूयते। तोष्टूयते। चीयात्। स्तूयात्। अकृत् इति किम्। प्रकृत्य। प्रहृत्य। परत्वात् दीर्घत्वेन तुको [9]बाधः स्यात्। असार्वधातुके इति किम्? चिनुयात्। [10]सुनुयात्। क्ङिति इत्येव, उरुया। धृष्णुया॥

## च्वौ च। (२६/२१२०)

च्विप्रत्यये परतोऽजन्तस्याङ्गस्य दीर्घो भवति। शुचीकरोति। शुचीभवति। शुचीस्यात्। पटूकरोति। पटूभवति। पटूस्यात्॥

---

1. शीङ् इति वर्तते इत्यधिकम् ब. 2. उपशय्यते ह. 3–4. गतः इत्यधिकम् ब. 5. इत्येव ब. 6. अभ्यूह्योऽयमर्थ ग. 7. नास्ति इ ह. 8. नास्ति ब. 9. बाधा ब.इ. 10. तनुयात् ह.